# Shri Krishnavarada Ashtakam

# શ્રીકૃષ્ણવરદાષ્ટકમ્

## Document Information

Text title : Shri Krishnavarada Ashtakam 06 13

File name : kRRiShNavaradAShTakam.itx

Category : vishhnu, aShTaka, krishna

Location : doc_vishhnu

Author : Shrikrishnalilashukamahakavimuni

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-13

Latest update : September 18, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2021

*sanskritdocuments.org*

Shri Krishnavarada Ashtakam

# શ્રીકૃષ્ણવરદાષ્ટકમ્

પરમાનન્દસર્વસ્વં પાશુપાલ્યપરિષ્કૃતં
    ચિરમાસ્વાદયન્તી મે જૃમ્ભતાં ચેતસિસ્થિતિઃ । (ચેતસ)
દૂરદૂરમુપારુહ્ય પતતામપિ ચાન્તરા
    સકૃદાક્રન્દનેનૈવ વરદઃ કરદો ભવેત્ ॥ ૧॥

મમ ચેતસિ માદ્યતો મુરારેઃ
    મધુરસ્મેરમુપાધ્વમાનનેન્દુમ્ ।
કમનીયતનોઃ કટાક્ષલક્ષ્મીં
    કન્યયાપિ (કલયાપિ) પ્રણતેનુ(ષુ) કામધેનોઃ ॥ ૨॥

વરદસ્ય વયં કટાક્ષલક્ષ્મીં
    વરયામઃ પરમેણ ચાપલેન ।
સકૃદપ્યુપગમ્ય સમ્મુખં
    સહસા વર્ષતિ યોષિતોઽપિ કામમ્ ॥ ૩॥

જૃમ્ભતાં વો હૃદયે ? ? જગત્ત્રયીસુન્દરાઃ કટાક્ષભરાઃ ।
અમ્ભોદાન્ ગગનચરાનાહ્વયમાનસ્ય બાલસ્ય ॥ ૪॥

જૃમ્ભન્તાં વઃ કરિગિરિજુષઃ કટાક્ષચ્છટા વિભોર્મનસિ ।
અમ્ભોધરમધઃકૃત્વા હષાન્ (હર્ષાત્સ્વૈ) સ્વરં શયાનસ્ય ॥ ૫॥

બ્રજજનવનિતામદાન્ધકેલિ-
    કલહકટાક્ષાવલક્ષવિભ્રમો વઃ ।
વિહરતુ હૃદયે વિલાસસિન્ધુ-
    ર્મુહુરબિલઙ્ગિતમુગ્ધશૈશવશ્રીઃ ॥ ૬॥

વરવિતરણકેલિધન્યધન્યા
    મધુરતરાઃ કરુણાકટાક્ષલક્ષ્મ્યાઃ ।
કરિગિરિસુકૃતાઙ્કુરસ્ય કસ્યા-

ભિનવવારિવહસ્ય વિભ્રતાં વઃ ॥ ૭॥

ઇત્યષ્ટકં પુષ્ટરસાનુબન્ધં
વિનોદગોષ્ઠીસમયે વિયુઙ્ક્તામ્ ।
વ્રજાઙ્ગનાનાં કુચયોઃ કરીન્દ્ર-
શૈલસ્ય મૌલૌ ચ મુહુર્વિહર્તા ॥ ૮॥

શ્રીકૃષ્ણલીલાશુકવાઙ્મયીભિ-
રેવંવિધાભિર્વિબુધાહતાભિઃ ।
પુષ્ણન્તુ ધન્યાઃ પુનરુક્તહર્ષ-
માયૂંષિ પીયૂષતરઙ્ગિણીભિઃ ॥ ૯॥

ઇતિ કૃષ્ણલીલાશુકમહાકવિમુનિવિરચિતં શ્રીકૃષ્ણવરદાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Gopalakrishnan

*Shri Krishnavarada Ashtakam*

pdf was typeset on September 18, 2021

Please send corrections to *sanskrit@cheerful.com*